[1]आपीः, प्यायः, पिप्यायिषुः, पेप्यः ;

प्यायितव्यम्, प्याययितव्यम्, पिप्यायिषितव्यम्, पेपीयितव्यम् ;

[2]प्रप्यायनीयम्, प्रप्यायनीयम्, पिप्यायिषणीयम्, पेपीयनीयम् ;

आप्याय्यम्, प्याय्यम्, पिप्यायिष्यम्, पेपीय्यम् ;

ईषत्प्यायः-दुष्प्यायः-सुप्यायः ; — —

प्याय्यमानः, प्याय्यमानः, पिप्यायिष्यमाणः, पेपीय्यमानः ;

आप्यायः, प्यायः, पिप्यायिषः, पेपीयः ;

आप्यायितुम्, आप्याययितुम्, पिप्यायिषितुम्, पेपीयितुम् ;

[3]प्याया, [A]आप्यायना, पिप्यायिषा, पेपीया ;

आप्यायनम्, [4]प्रप्यायनम्, पिप्यायिषणम्, पेपीयनम् ;

प्यायित्वा, प्याययित्वा, पिप्यायिषित्वा, पेपीयित्वा ;

आप्याय्य, प्रप्याय्य, प्रपिप्यायिष्य, प्रपेपीय्य ;

प्यायम् २, प्यायित्वा २, } प्यायम् २, प्याययित्वा २, } पिप्यायिषम् २, पिप्यायिषित्वा २, } पेपीयम् २ ; पेपीयित्वा २. }

## (1065) " प्यैङ् वृद्धौ " (I-भ्वादिः-964. अक. अनि. आत्म.)

प्यायकः-यिका, प्यापकः-पिका, पिप्यासकः-सिका, पाप्यायकः-यिका ;

प्याता-त्री, प्यापयिता-त्री, पिप्यासिता-त्री, पाप्यायिता-त्री ;

— प्यापयन्-न्ती, प्यापयिष्यन्-न्ती-ती ; —

---

1. 'अन्येभ्योऽपि दृश्यते' (3-2-178) इत्यत्र बाहुलकात् 'ध्याप्योः सम्प्रसारणं च' (भाष्यम्) इति वचनात् आङ्पूर्वादस्मात् क्विपि, सम्प्रसारणे, 'लोपो व्योर्वलि' (6-1-66) इति यलोपे च रूपमेवमिति **प्र. सर्वस्वे**। प्रकृतसूत्रे 'ध्यायतेः सम्प्रसारणं च' इत्येव **भाष्ये** दृश्यते। '**भट्टपाद**सम्मतोऽयं पाठः स्यात् दाक्षिणात्यः साधुः।' इति **प्र. स. टीका** (पु. 68)।

2. उपसर्गस्थान्निमित्तात् परस्य अच उत्तरस्य कृत्स्थस्य नकारस्य 'न भाभूपूकमिगमिप्यायीवेपाम्' (8-4-34) इति णत्वनिषेधः।

3. 'गुरोश्च हलः' (3-3-103) इति स्त्रियाम् अकारप्रत्ययः।

4. 'ण्यन्तभादीनामुपसंख्यानम्' (वा. 8-4-34) इति ण्यन्तादुपसर्गस्थान्निमित्तात् परस्य कृत्स्थस्य नस्य णत्वनिषेधः।

A. 'छायाविशेषैः प्रचितैस्तदर्हामाप्यायनामारचयन्ति वृक्षाः॥' या.अ.18.67.